# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - आचार्य-१ ( Sem_2 )** **प्रश्नपत्र-२** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CC 4.2.4 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः -** 18/04/2016 **सन्दर्भग्रन्थः - महाभारते शान्तिपर्वणि - ५१ तः १००**

---

## युनिट-१

**प्रश्न-१ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** ०८

१. यच्च भूतं भविष्यच्च नेवच्च मपरद्युते । तत् सर्वमनुपश्यामि पाणौ फलमिवार्पितम् ॥

२. ब्राह्मणानां यथा धर्मो दानमध्ययनं तपः । क्षत्रियाणां तथा कृष्ण समरे देहपातनम् ॥

३. यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा । नरेन्द्र धर्मो लोकस्य तथा प्रग्रहणं स्मृतम् ॥

**प्रश्न-२ भीष्मकृतराजधर्मविवेचनं कुरुत ।** ०८

**अथवा**

**वर्णधर्माणां सविस्तरं विवेचनं कुरुत ।**

**प्रश्न-३ टिप्पणीद्वयं लिखत ।** ०४

१. पृथुचरितम् ।

२. श्रीकृष्णः ।

३. भीष्मो राजनीतिज्ञः ।

४. आश्रमधर्माः ।

## युनिट-२

**प्रश्न-४ पद्यद्वयं ससन्दर्भं सप्रसङ्गं व्याख्यायताम् ।** ०८

१. अराजन्याः प्रजाः पूर्वं विनेशुरिति नः श्रुतम् ।
परस्परं भक्षयन्तो मत्स्या इव जले कृशान् ॥

२. आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः ।
अजितात्मा परपतिर्विजयेत कथं रिपून् ॥

३. सम्यग्दण्डधरो नित्यं राजा धर्ममवाप्नुयात् ।
नृपस्य सततं दण्डः सम्यग् धर्मः प्रशस्यते ॥

**प्रश्न-५ दण्डनीतिवर्णनं सविस्तरं यथाग्रन्थं निरूपयत ।** ०५

**अथवा**

**राज्ये पुरोहितावश्यकतां विलिख्य सदाचारमहत्त्वञ्च प्रतिपादयत ।**

**प्रश्न-६ टिप्पण्येका विलिख्यताम् ।** ०२

१. मुचुकुन्दः ।

२. पुरुरवा ।

## युनिट-३

**प्रश्न-७ पद्यद्वयस्य ससन्दर्भं विवेचनं कुरुत ।** ०६

१. येषां पुरोगमा विप्रा येषां ब्रह्म परं बलम् । अतिथिप्रियास्तथा पौरास्ते वै स्वर्गजितो नृपाः ॥

२. अप्रामाण्यं च वेदानां शास्त्राणां चाभिलङ्घनम् । अव्यवस्था च सर्वत्र तद् वै नाशनमात्मनः ॥

३. अरणीमग्निकामो वा मथ्नाति हृदयं मम । वाचा दुरुक्तं देवर्षे ततन्मे दहति नित्यदा ॥

**प्रश्न-८ कुटुम्बव्यवस्थां सविस्तरं विवेचनं कुरुत ।** ०६

**अथवा**

**मित्रामित्रपरीक्षणस्य सविस्तरं विवेचनं कुरुत ।**

**प्रश्न-९ लघूत्तरत्रयं लिखत ।** ०३

१. राजधर्माणां कः वक्ता कश्च श्रोता?

२. राजधर्मोपदेशाय कृष्णेन कः आदिष्टः?

३. चतुर्विधानि मित्राणि कानि?

४. कृष्णो वासुदेवः कस्मात् स्मृतः?

५. भीष्मः गाङ्गेयः कस्मात् उक्तः?

## युनिट-४

**प्रश्न-१० पद्यद्वयं सप्रसङ्गं व्याख्यायताम् ।** ०८

१. आत्मानं सर्वतो रक्षन् राजन् रक्षस्व मेदिनीम् । आत्ममूलमिदं सर्ममाहुर्वै विदुषो जनाः ॥

२. कर्म शूद्रे कृषिर्वैश्ये दण्डनीतिश्च राजनि । ब्रह्मचर्यं तपो मन्त्राः सत्यं चापि द्विजातिषु ॥

३. यदि नात्मनि पुत्रेषु न चेत् पौत्रेषु नसृषु । न हि पापं कृतं कर्म सद्यः फलति गौरिव ॥

**प्रश्न-११ उतथ्योपदेशे धर्माचरणवर्णनप्रसङ्गो वर्तते तं सप्रमाणं विवेचयत ।** ०८

**अथवा**

**कोशसङ्ग्रहविवेचनं यथाग्रन्थं सविस्तरं कुरुत ।**

**प्रश्न-१२ चत्वारि लघूत्तराणि लिखत ।** ०४

१. मान्धाता कः अवर्तत?

२. राज्ञा करग्रहणं कथं कार्यम्?

३. कृष्णद्वैपायनः कस्यापरं नाम?

४. पाण्डवेषु कः अजातशत्रुः प्रोक्तः?

५. पाण्डवाः कस्मात् पाण्डवाः कथ्यन्ते?

६. कौरवाः कस्मात् धार्तराष्ट्राः प्रोक्ताः?